# अर्थविज्ञान-काव्यविज्ञानयोः शेमुषी - डॉ. कुञ्जुन्नी राजा

**- न. र. पत्तरकिने**

भारतीय-संस्कृतज्ञेषु धुरि कीर्तनीयानां डॉ. के. कुञ्जुन्नी-राजा-महोदयानाम् इदं जन्मशताब्दपर्व वर्तते। बृहद्भारते भारतविद्यायाः (Indology) विशिष्य संस्कृतविद्यायाः कृते देवभूमेः केरलस्य महद् योगदानं विद्यते। आदिशङ्कराचार्यस्य इयं जन्मभूमिः। साहित्य-वेदान्त-दर्शन-मीमांसावत् तन्त्र-मन्त्र-ज्योतिर्विज्ञान-वैद्यकादि-शास्त्रेषु व्यलसत् केरलीय-पण्डितानां प्रतिभाप्रभा। केरलीयपण्डितैः प्रणीता एतद्विषयकाः नैके ग्रन्थाः समुपलभ्यन्ते। स्वयं कुञ्जुन्नी-राजा-महोदयेन "Contribution of Kerala to Sanskrit Literature" इति प्रबन्धं प्रणीय विषयोऽयं सविस्तरम् उपन्यस्तः। प्रबन्धमिमं तैः डॉ. सी. कुन्हन् राजा(तेषामेव पितृव्यानां)-महोदयानां मार्गदर्शने विलिख्य मद्रास-विश्वविद्यालयस्य डॉक्टरोपाधिः समर्जितः। प्रथम-विश्व-संस्कृत-सम्मेलनावसरे कुञ्जुन्नी-राजा-वेंकिटसुब्रमोनिय अय्यर इति उभाभ्यां संस्कृत-साहित्यस्य कृते केरलीयं योगदानम्, अथ च संस्कृतशास्त्राणां कृते केरलप्रदेशस्य अवदानम् इति यथाक्रमं निबन्धं प्रस्तूय संस्कृतक्षेत्रे केरलमहिमा ख्यापितः।[1] विस्तारभयात् निबन्धयोः परिचयोऽत्र परिह्रियते। केवलम् इदमेव पर्याप्तं वक्तुं यत् केरलः एकमेव प्रदेशः यत्र भासनाटकचक्रम्; कौटिलीय-अर्थशास्त्रम्; कामन्दकीय-नीतिशास्त्रम्; भोजस्य शृङ्गारप्रकाशः इति ख्यातग्रन्थानां दुर्लभाः अमूल्याश्च मातृकाः संरक्षिताः विद्यन्ते। विदितचरं यत् नम्पूतिरि-ब्राह्मणानां वेदमन्त्रपठनस्य काऽपि विशिष्टा रीतिर्वर्तते यस्याः गभीरालोडनं फ्रिटझ स्टाल्-महोदयेन स्वकीये ग्रन्थे कृत इति पठ्यते। अपि च मार्कसरण्या भारतविद्याविमर्शं (Marxist Indology) कर्तुं प्रवृत्तेषु गवेषकेषु नम्बुद्रिपादानां गणना भवति इति पठामः।

आधुनिके काले यैः केरलीयपण्डितैः संस्कृत-वैदुष्यपन्थाः प्रशस्तीकृतः तेषु टी गणपति-शास्त्री, सुब्बाराम पट्टार पी एस् (Studies in Dhvanyaloka इति ग्रन्थस्य कर्ता), ख्यातस्य 'संस्कृत-पोएटिकस्' ग्रन्थस्य लेखकः कृष्णचैतन्यः (के के नायर) विश्वसाहित्यमर्मज्ञः, श्री. परमेश्वर अय्यर, को अ सुब्रमोनियन् अय्यर (वाक्यपदीयविशेषज्ञः), डॉ. सी. कुन्हन् राजा (ए सर्व्हे ऑव् संस्कृत-लिटरेचर' इति ग्रन्थस्य कर्ता), के व्ही सरमा, डॉ. सी आर् स्वामिनाथन्, प्रो. वेङ्किटसुब्रमोनिय अय्यर, प्रो. कुञ्जुन्नी-राजा सविशेषम् उल्लेखनीयाः। प्रो. सी. डी. बिजेलवान् लिखति - ''नैकैः केरलीय-विद्वद्वरैः के कुञ्जुन्नी-राजा-प्रो. श्रीकृष्णशर्मा, डॉ. सी

आर् स्वामिनाथन्-प्रभृतिभि: विविधासु शोधपत्रिकासु लेखादिकं प्रकाश्य संस्कृतविद्यासत्रे बृहद् योगदानं कृतम्। कुञ्जुन्नी-राजा-महोदया: 'संस्कृत: कन्टिन्युअस् इन्स्पिरेशन' इति लेखं साहित्य-अकादम्या प्रकाशिते 'इंडियन लिटरेचर् इति ग्रन्थे व्यलिखन्। वैदुष्यपरम्परा अद्यापि अक्षुण्णा प्रचलति डॉ. सी राजेन्द्र, पि. सि. मुरलीमाधवन् इत्यादिभि: अनुष्ठितेषु गवेषण-कार्येषु।[2]

## प्रो. ब्रफ् राजा च

डॉ. कुञ्जुन्नी-राजा-महोदयानां वैदुष्य-यात्रायां ख्यात-ब्रिटिश-संस्कृतज्ञस्य केम्ब्रिज्-प्राध्यापकस्य जॉन ब्रफ् (John Brough)-महोदयस्य अनितरसाधारणं स्थानं भवितुमर्हति इति प्रतिभाति। उभाभ्यां परिशीलितेषु वैदुष्यविषयेषु विलक्षणं साम्यं दृश्यते इति वक्तुं शक्यम्। मद्रास-विश्वविद्यालयत: पीएच्.डी-पदवीं समर्ज्य डॉ. कुञ्जुन्नी-राजा-महोदया: लंडन स्कूल् ऑव् ओरिएन्टल् अँड् आफ्रिकन् स्टडीज् इत्याख्यायां संस्थायां प्रो. ब्रफ्-महोदयानां शिष्यत्वं स्व्यकुर्वन्। १९५२-५४ इति वर्षद्वयं तत्र उषित्वा ब्रफ्-महोदयानां मार्गदर्शनेन एव तै: 'इंडियन् थिअरीज् ऑव् मीनिंग्' इति प्रबन्धं विलिख्य प्राप्ता अन्या पीएच्.डी.। वाक्यपदीयो ध्वन्यालोकश्च इति ग्रन्थद्वयस्य विमर्श इति उभयो: अध्ययनसाधर्म्यविशेष:। परम्परया यो वाक्यविचार: स तु सिमान्टिकस् (अर्थविज्ञानम्) इति पारिभाषिकसंज्ञया व्यपदिश्यते। सिमान्टिकस् इति ज्ञानशाखायाम् उभौ अपि कार्यं कुर्वन्तौ आस्ताम्। प्रो. ब्रफ्-महोदयानां विषये स्वयं डॉ. कुञ्जुन्नी-राजा-महोदया: लिखन्ति - ''लंडन इत्यत्र ब्रफ्-महोदयानां मार्गदर्शनेन 'इंडियन् थिओरीज् ऑव् मीनिंग्' इति विषयमधिकृत्य कार्यं कर्तुं मे भाग्यविशेष: प्राप्त:। ट्रान्झॅक्शन्स ऑव् फिलॉलॉजिकल् सोसायटी' मध्ये प्रकाशितानां तेषां विषयेऽस्मिन् प्रेरका: लेखा: अथ च तै: साकं जाता चर्चा इति द्वयं मम प्रबन्धलेखनकार्यसम्पादने कारणीभूतम्। ब्रफ्-महोदयानां निधनोपरि तेभ्य: शब्दनिवापान् समर्पयन्त: राजा-महोदया: ऊचु: - वाक्यपदीय-ध्वन्यालोकयो: गभीरालोडनं कृत्वा ब्रफ्-महोदयै: ग्रन्थगतदूरुहसमस्यानां समाधाने स्वकीयाया: सूक्ष्मप्रतिभाया: दर्शनम् अकारि। तेषां मते अन्यप्रकल्पस्वीकरणात् पूर्वम् अङ्गीकृतप्रकल्प: परिणामपदं नीतो वा न वा इत्यपेक्षया नूतन-क्षेत्रस्य चयनं तत्र च पन्थान: प्राशस्त्यं यदि साध्यते तर्हि तत् श्रेयस्करम्।[3] विदितचरमेव यत् ब्रफ्-महोदयेन अर्थविज्ञानवत् संस्कृत-व्याकरणे लक्षितानि सामान्य-भाषाविज्ञान-तत्त्वानि अपि विमृष्टानि। ब्रफ्-पन्थानमेनमनुसृत्य डॉ. कुञ्जुन्नी-राजा-महोदया अपि संस्कृत-भाषा-विज्ञानक्षेत्र-मण्डितान् बहून् निबन्धान् अखिल-भारतीय-प्राच्य-विद्या-परिषद: अधिवेशनेषु पठितवन्त:। ब्रफ्-महोदयेन आनन्दवर्धनकृत-ध्वन्यालोकस्य आङ्ग्लानुवाद: विहित:। डॉ. कुञ्जुन्नी-राजा-महोदयेन 'आनन्दवर्धन:'

(ध्वन्यालोककार:) इति शीर्षकेण लिखित: प्रबन्ध: साहित्य-अकादम्या प्रकाशित एव। ध्वनिमीमांसां विशदयन् अन्यत्र डॉ. कुञ्जुन्नी-राजा लिखति - इदमत्र निर्देश्यं यत् ध्वनिवादिनस्तु अर्थस्य व्यापकत्वम् ईदृशं मन्यन्ते यत्र काव्यद्वारा प्रख्याप्यमानं यत् सर्वं तत् सन्निविष्टं वर्तते। अर्थस्य व्यापकत्वं न केवलं ज्ञानात्मकम् अर्थं बोधयति, भावनात्मकं सङ्कल्पात्मकम् अर्थो वा, सन्दर्भसाधनसाहाय्येन सूचितवाक्यानां सामाजिक-सांस्कृतिक-व्यपदेशं अपि अवगमयति।[4] अन्यच्च, भर्तृहरिणा वाक्यपदीये प्रस्तुतं स्फोटतत्त्वं मीमांसयन् कुञ्जुन्नी-राजा श्लोकवार्तिकगतं

**''यावन्तो यादृशा ये च यदर्थप्रतिपत्तये।**
**वर्णा: प्रख्यातसामर्थ्यास्ते तथैवावबोधका:॥**

इति उद्धरणं निर्दिश्य प्रतिपादयन्ति - यत् 'स्फोट'-प्रतिपादनस्य नावश्यकता इति उच्यते। वैय्याकरणानां मतमिदं यद् यद्यपि प्रत्यक्षलोकव्यवहारेण अर्थो गृह्यते तर्हि वाक्यस्य वा शब्दस्य ऐक्यभावं (एकसन्धत्वं) साकल्येन अनुभूयते न तु तत्र स्थितानाम् अक्षराणां समुच्चयरूपेण। सोऽनुभव: अलीक इति वक्तुं न किमपि कारणम्।[5] ब्रफ्-राजा-महोदययो: वैदुष्यसरण्यां साम्यस्थलानि द्रष्टुं शक्यते इत्येव निदर्शने अत्र हेतु:।

## संस्कृत-व्याकरण-विमर्श:

डॉ. कुञ्जुन्नी-राजा-महोदयेन संस्कृत-व्याकरणमधिकृत्य नैके निबन्धा: प्रस्तुता:। विश्वविख्यातेन पाणिनी-मर्मज्ञेन डॉ. जॉर्ज-कार्दोना-महोदयेन स्वकीये 'पाणिनी : ए सर्व्हे ऑव् रीसर्च्' इत्याख्ये ग्रन्थे राजा-महोदयेन लिखितानां निबन्धानां सूचिरेका तत्र दत्ता।[6] कार्दोना-महोदयै: डॉ. राजा-महोदयानाम् अर्थविज्ञानविषयकं गवेषणं संस्तुत्य उक्तम् - भारतीय-अर्थविज्ञानमाहत्य उपलब्धेषु नैकेषु परिचायक-ग्रन्थेषु (सामान्यग्रन्थेषु) ग्रन्थद्वयं तत्र महत्त्वम् आवहति। तत्र एकस्तावत् डॉ. कुञ्जुन्नी-राजा-महोदय-प्रणीत: इंडियन थिअरीज ऑव् मीनिंग (१९६९) विशेषं समुल्लिख्यते। अर्थविज्ञानविषये प्रमुखधारणानां संक्षेप: राजा-महोदयै: प्रस्तुत:। यद्यपि विविधवादानां विषये ख्यापितमतानां विश्लेषणं तत्र न विहितं तथाऽपि तेषां विषयप्रस्तुतिस्तावत् सहजबोध्यत्वं विश्वास्यं च भजते। विषयोऽयं अन्याङ्गेन अन्यत्र उपन्यस्यन्त: डॉ. कुञ्जुन्नी-राजा-महोदया: प्रतिपादयन्ति- ''पाणिने: अष्टाध्याय्यां लक्षणाया: (Metaphoric Transfer) न काऽपि चर्चा कृता इति लक्ष्यते यद्यपि केभ्यश्चित् सूत्रेभ्य: इदं प्रतिभाति यत् क्षीणलक्षणाया: अस्तित्वस्य (existence of faded metaphors), शब्दानाम् आरोपित-व्यवहारस्य (tranferred use of words) विषये च पाणिनि: अनभिज्ञो नासीदिति।[8]

## परिषत्सु योगदानम्

डॉ. कुञ्जुन्नी-राजा-महोदयैः अखिल-भारतीय-प्राच्यविद्या-परिषदः अधिवेशनेषु दीर्घकालं यावत् स्ववैदुष्यं ख्यापितमासीत्। तेषां परिषद्यात्रा तु पुरा नागपुरे एव सम्पन्ने त्रयोदशाधिवेशने (१९४६) एव प्रारब्धा। तत्र तैः ''अभिजात-संस्कृत-विभागे 'नारायणभट्टस्य कालः' (The date of Nārāyaṇa Bhaṭṭa) इति स्वकीयं शोधपत्रं पठितमासीत्। ततः आरभ्य अन्नमलाईनगर, दिल्ली भुवनेश्वर-श्रीनगर-गुवाहाटी-इत्यादिषु अधिवेशनेषु संस्कृत-साहित्य-भाषाविज्ञान- व्याकरण-दर्शनादि-विषयेषु शोधपत्राणि प्रपठ्य पाण्डित्यप्रसरो प्रादुष्कृतः। मातृभाषां मलयालम-भारतीमपि ते तत्र सेवितवन्तः।[9] दिङ्गमात्रेण केषाञ्चन निबन्धानां सन्दर्भाः प्रस्तूयन्ते अत्र। उज्जयिन्यां सम्पन्ने षडविंशतितमे (१९७२) अधिवेशने ''अभिजात-संस्कृत'-विभागे प्रस्तुते 'चौरान् न दिदृक्षते' वचनस्य अर्थकरणम् इति निबन्धसङ्क्षेपे तैः प्रतिपादितं यत् 'चौरान् न दिदृक्षते' इति वचनस्य अर्थकरणे भट्टोजि-दीक्षितेन 'अन्तर्धौ' इति संज्ञायाः या आवश्यकता 'अन्तर्धौ येनादर्शनमिच्छति' इति पाणिनी-सूत्रस्य व्याख्यानावसरे निर्दिष्टा सा अस्थाने वर्तते। 'चौरान् न दिदृक्षते' इत्यत्र 'दर्शन-इच्छयोः' भिन्नकर्तृकत्त्वाद् अर्थनिष्पादने सामर्थ्यं गमकत्वं च न विद्येते। स्वयं भट्टोजि-दीक्षितः शब्दकौस्तुभे सूत्रस्थितेयं 'अन्तर्धौ' इति संज्ञा प्रयोजनशून्या मन्यते यतो हि संज्ञारहितत्वेऽपि 'चौरान् न दिदृक्षते' इति वचनं स्वयमेव अर्थं बोधयति इति।[10(a)] पुनः तस्मिन्नेव विभागे प्रस्तुते अपरे निबन्धे केनापि अज्ञातनाम्ना केरलीय-कविना रचितस्य 'विटनिद्रा' इति भाणप्रकारस्य परिचयो दत्तः।[10(b)] तत्रैव 'कालिदास' इति विशेषविभागे शोधपत्रमेकं प्रस्तुतम्।[10(c)] कुरुक्षेत्रे परिषदः सम्पन्ने सप्तविंशतितमे अधिवेशने (१९७४) 'भारतीय-भाषा-विज्ञानम्' इति विभागे 'मातुर्मातच् पुत्रार्थमर्हते' इति तथाकथितं वार्तिकं स्वीकृत्य तत्र तैः कृतं विवेचनं मनोज्ञं खलु। 'मातच्' इति पदस्य अर्थविज्ञानात्मकं व्यवच्छेद्यं सूक्ष्मार्थं (Semantic nuance) विशदीकर्तुं डॉ. राजा-महोदयैः परवर्तिव्याकरणग्रन्थस्य स्वसम्पादितस्य 'मुखभूषण'-ग्रन्थस्य निर्देशः कृतः। एवम् आहत्य वक्तुं शक्यते यत् राजा-महोदयैः भट्टोजि-दीक्षितविरचितग्रन्थानां सूक्ष्मतमम् अध्ययनं व्यधायि।[11] इदमत्रमवधेयं यत् नव्यन्यायोऽपि तेषां सूक्ष्ममेक्षिकायाः प्रज्ञायाः विमर्शविषयो जातः। दिल्ली-नगरे सम्पन्नायां पड्विंशतितमायां (१९६४) विश्व-प्राच्य-विद्या-परिषदि (International Congress of Orientalists) 'धर्मं तत्त्वज्ञानं च' इति भारतविद्यायाः (Indology) उपविभागे पठिते संक्षिप्ते शोधपत्रे डॉ. कुञ्जुन्नी-राजा प्रत्यपादयन् - शब्दार्थविवेचनावसरे उधृतः श्लोकवार्तिकगत-श्लोकः मण्डनमिश्रकृत इति यत् प्रथमं गङ्गेशोपाध्यायेन तदनु गदाधरेण च यथा स्वीकृतं तदयथार्थम्। नव्यन्याय-सम्प्रदायस्य शिरोमणिना गङ्गेशोपाध्यायेन 'तत्त्वचिन्तामणि'-

ग्रन्थस्य 'शक्तिवाद'-प्रकरणे शब्दस्य मुख्यार्थः 'जातिः' इति प्रतिपादनावसरे यानि त्रीणि मतानि निवेदितानि तत्र 'लक्षणा'विषयकं तृतीयं मतं मण्डनमिश्रस्य इति निदर्शनावसरे यः श्लोकः निर्दिष्टः यश्च पुनः गदाधरेण 'शब्दशक्तिप्रकाशे' उधृतः स तु वस्तुतः कुमारिलभट्टकृत-श्लोकवार्तिकस्य वाक्याधिकरण-प्रकरणे उपलभ्यते। श्लोकवार्तिकस्य टीकाकारेण पार्थसारथीमिश्रेणापि श्लोकोऽयं कुमारिलभट्टस्यैव मतम्। डॉ. राजा अग्रे न्यवेदयन् यत् मण्डनमिश्राणां ग्रन्थेषु श्लोकोऽयं न कुत्रापि उपलभ्यते अपरं च, मण्डनमिश्राः कुमारिलभट्टानां परवर्तिन इति।[12] अस्यामेव विश्व-प्राच्य-विद्या-परिषदि डॉ. राजा-महोदयाः 'अभिजात-संस्कृत-विभागस्य साचिव्यं निरवहन्, यत्र डॉ. लुडविक् स्टर्नबाख् आध्यक्ष्यं व्यभूषयन्। विश्व-संस्कृत-सम्मेलनेऽपि ते आरम्भतः स्वोपस्थितिं आवेदितवन्तः आसन्। वाराणस्याम् ईशवीये १९८१ वत्सरे आयोजिते विश्व-संस्कृत-सम्मेलनस्य पञ्चमे अधिवेशने कथासरित्सागरः प्राचीन-मध्ययुगीन-भारतस्य कथासाहित्यमधिकृत्य आयोजिते विशेषसत्रे तैः 'कथासरित्सागरः कुटियट्टम् च' इति विषयमधिकृत्य शोधपत्रमेकं पठित्वा नूतनः कश्चित् पक्षः उद्घाटितः। चाक्यार-नम्ब्यार-समाजैः 'कुट्टमपलम्' इति नाम्ना ख्याताया: मन्दिराश्रितरङ्गभूमेः परम्परा 'कुडियट्टम्' द्वारा सहस्राधिकवर्षेभ्यः अक्षुण्णत्वेन परिरक्षिता। पौराणिकीं रीतिमवलम्ब्य केरलीय-परम्परा प्रवर्तते, यद्यपि भिन्नरुचेर्जनस्य समाराधनाय कानिचित् परिवर्तनानि समाविष्टानि स्युः। तत्रोदाह्रियते यथा विदूषकः मलयालम-मणिप्रवाल-भाषामाश्रित्य संस्कृत-प्राकृत-स्थितां संहितां विशदीकरोति। अथ च यत्र विडम्बनशैल्याः विनोदकथानां च प्रयोगः क्रियते। चोक्यार-समाजेन रङ्गभूम्याम् अभिनीतेषु नाटकेषु बृहत्कथां वा तस्याः संस्करणानि कथानकरूपेण गृहीत्वा भासमहाकविना विरचिताः स्वप्नवासवदत्तम्, प्रतिज्ञायौगन्धरायण-अविमारकादि कृतयः गण्यन्ते। निर्वहणे पूर्वकथायाः निरूपणं भवति। ताः कथाः सरित्सागरे लभ्यमानाभिः कथाभिः साम्यं विन्दन्ति।[13] फिलाडेल्फियापुर्या पेन्नसिल्व्हेनिया विश्वविद्यालये इसवीये १९८४ वत्सरे सम्पन्ने षष्ठे विश्व-संस्कृत-सम्मेलने प्राचीनम् आधुनिकं च संस्कृतम् इति विभागस्य आध्यक्ष्यं विभूष्य तस्मिन्नेव विभागे Politeness Expression in Sanskrit (संस्कृते सौशील्यशालीशालीनं वचः) इति शोधपत्रं प्रास्तुवन्। मण्डनमिश्रमण्डितमण्डल्यां ते भारतसर्वकारस्य तत्र सम्मेलने प्रातिनिध्यम् अभजन्।

## केरलविद्वद्भूषणम्

संस्कृत-विद्यायाः विविधाङ्गेषु स्ववैदुष्यं ख्यापयन्तः डॉ. कुञ्जुन्नी-राजा-महोदयाः केरलविद्वन्मूर्धन्य इति वक्तुं नातिशयोक्तिः। तेषां वैबुध्यं दक्षिण-भारते प्रकाशितासु जर्नल ऑव् ओरिएन्टल रिसर्च, अड्यार् लायब्रेरी बुलेटिन अन्यासु च पत्रिकासु स्फुटतां गतम्। 'ब्रह्मविद्या'-

पत्रिकायास्तु ते सम्पादका एव आसन्। प्राय: त्रिंशत् ग्रन्था: द्विशतशोधपत्राणि तेषां पाण्डित्यपरिचायका: सन्ति। काँट्रिब्यूशन् ऑव् केरला टू संस्कृत-स्टडीज्, इंडियन-थिअरीज् ऑव् मीनिंग, आनन्दवर्धन: इति प्रबन्धत्रयादतिरिक्तं तै: हॅरोल्ड कॉवर्ड-महोदयानां सहलेखकत्वे फिलोसॉफि ऑव् ग्रामर इति ग्रन्थ: सम्पादित:। 'न्यू कॅटालॉगस् कॅटलॉगोरम्' इति बृहत् मातृकासूचिग्रन्थस्य प्रारम्भिक-खण्डानां सम्पादने ते प्रेरका: अवर्तन्त। संस्कृतविद्याध्ययने नितरां व्यापृता: सन्तोऽपि ते मातृभाषाम् अमलां मलयालमभारतीं न विस्मृतवन्त:। मलयालम, लोंदोनील, भाषा चिन्थकल, भाषा-गवेषणम् इति कृतय: तत्र निदर्शनम् आवहन्ति। तेषां ग्रन्थानां विशिष्य आनन्दवर्धनस्य ध्वनि-मीमांसा अथ च अभिनन्दकृतं रामचरितम् इति ग्रन्थयो: परीक्षणं शोधपत्रिकायाम् अन्यत्र द्रष्टुं शक्यते।[15(i)] तैरपि लुडविक् स्टर्नबाख्-महोदयेन सम्पादितस्य 'चाणक्य-नीति-टेक्स्ट ट्रेडिशन्' इति ग्रन्थस्य विमर्श: कृत:।[15(ii)] दिक्षु दिक्षु आविष्कृत-पाण्डित्येन ते बहुमानोन्ततिपदान्यस्पृशन्। केरल-साहित्य-अकादम्यास्ते परामर्शदातृमण्डले कार्यम् अकुर्वन्। सेन्ट्रल फिल्म सेन्सार बोर्ड मध्येऽपि सदस्यत्वेन तै: पदं कृतमासीत्। नैतदाश्चर्यं यत् ते यथाकालं संस्कृतस्य कृते राष्ट्रपति-पुरस्कारप्रदानेन सभाजिता इति। वयस: परिणतावस्थायां पञ्चाशीतिवर्षे (३० मई २००५) गोलोकं प्रस्थितवन्त:।[16] तेषां जन्मशताब्दसमापनावसरे एष आदराञ्जलि:।

**REFERENCES**


1(a). **K. Kunjunni Raja -** Contribution of Kerala to Sanskrit studies - Contribution of Different areas and countries to Sanskrit studies and Development of Sanskrit studies in different areas and countries - Volume I, Part II - Proceedings of International Sanskrit Conference, New Delhi, 1972. Editor : Dr. V. Raghavan, P.P. 276-281.

1(b). **S. Venkitsubromania Iyer -** Contribution of Kerala to Sanskrit Shāstrās - ibid P.P. 282-301.

2. A number of scholars and poets of Kerala, for instance, Prof. K. Kunjunni Raja, Prof. Shreekrishna Sharma and Dr. C. R. Swaminathan (to mention a few), have contributed a lot towards the Sanskrit studies through their articles appearing in various research journals. Sanskrit : Continuing inspiration, a learned article, by Prof. Raja appeared in the Sahitya Academy Journal, India Literature, November-December 1980.

- C. D. Bijelwan - Kerala - Sanskrit Studies in India - Editor - Dr. R. N. Dandekar (A special Publication brought out on the occasion of 5th World Sanskrit Conference, Varanasi, 1981), P. 68.

3. “I had the priviledge of working under his guidance (1952-54) in London on “Indian Theories of Meaning” (Adyar Library Madras 1963). His stimulating papers in Transactions of Philological Society and the discussions I had with him, were responsible for my succesful completion of the Thesis. With his intimate knowledge of Sanskrit texts like Vākyapadīya and the Dhvanyāloka and his penetrating insight Brough could illuminate many a complicated issues on the subject. He once told me that finding a fresh field and leading a clear path to it is commendable in itself that it is not necessary that one should complete a project one has started before taking up another.”

- K. Kunjunni Raja - “Obituary on John Brough - Newsletter of the International Association for Sanskrt Studies - Part I - Editor - Siegfried Lienhardt - Stockholm - Turin, 1984, P.24.

4. “It is of interest to note that the protagonist of Dhvani theory enlarge the term artha or meaning to include all that is conveyed by a poem. It includes not only the cognitive meaning but also the emotive or volitional sense and socio-cultural significance of utterences suggested with the help of contextual factors.

- K. Kunjunni Raja - The Dhvani theory - Indian Aesthetics - An Introduction - Editor - V. S. Seturaman, Macmillan 1992, P.308.

5. ‘‘यावन्तो यादृशा ये च यदर्थप्रतिपत्तये।

वर्णा: प्रख्यातसामर्थ्यास्ते तथैवावबोधका:।।

- श्लोकवार्तिक

Hence it is argued that there is no necessary for postulating the Sphota. The grammarian’s point of view is that even though the meaning is learnt from their function in actual usage, we do experience the word or the sentence as unitary entity, as a whole, and not as an aggregate of the various letters comprising it. And, there is no reason to consider this experience as false.”

- K. Kunjunni Raja - Bhartṛhari’s discussion of Sphota. ibid. P.286.

6. K. Kunjunni Raja
   (i) Prabhavali (rare work dealing with Sanskrit root)
   (ii) The theory of Meaning according to Buddhist logic
   (iii) Indian theories of homophonous and homonym
   (iv) Uṇādikośa by Mahadev Vedantin - (ed.)
   (v) The theory of suggestion in Indian semantics
   (vi) Sphoṭa theory of linguistic symbols
   (vii) Tranfer of Meaning - a Buddhist view
   (viii) Akāñkśā the main basis of syntactic unity
   (ix) Indian influence on linguistics

   - George Cardona
   - Part I - Bibliography - Pāṇini - A Survey of Research - P.14-15.
   - Motilal Banarasidas 1976

   (Other listings are ommitted as those are covered under Reference No.9)

7. "Several General works on Indian semantic views are available, among which two are especially noteworthy K. Kunjunni Raja (1969) gives a clear summary of major positions. Though Kunjunni Raja does not enter into details concerning the arguments advanced in support of different views his presentation is lucid and trustworthy."

   - George Cardona. Part II, Section V1 - A survey - ibid P. 295.

8. In Pāṇini's Aṣṭādhyāyi the role of lakṣaṇā or metaphoric tranfer (including metonomy) is not discussed at all, even though it is obvious from some of his sūtrās that he was not aware of the existence of faded metaphors and tranferred use of words in language."

   - K. Kunjunni Raja - Pāṇini and Metaphor - Aspects of Pāṇinian Semantics - (Symbosiam) Edited C. Rajendran, Sahitya Akademi, 2002.

9 (a). The date of Nārāyaṇa Bhatta - Part II - Proceedings of the 13th All India Oriental Conference, Nagpur 1946, P.P. 183-186.

(b). Students of Melputtūr Nārāyaṇa Bhatta - Summaries of 15th All India Oriental Conference, Bombay 1949, P.P.61-62.

**- K. V. Sarma - Index of Papers submitted to the All India Oriental Conference - Sessions (XIII to XVII) Bhandarkars**

**Oriental Research Institute, Poona 1959, P.P.94-95.**

(c)(i) Date of Royal dramatist Kulaśekhar - Varman - Summaries of the 18th All India Oriental Conference - Annamalainagar, 1955, P.37.

(ii) Diachronic Linguistics in ancient India - ibid, P.96.

(iii) Yāskā's definition of the verb and the nouns in the light of Bhartṛhari's explanation - ibid P.97.

(iv) Elliptical sentences according to Mimāmsā a and Nyāya school - Part II - Proceedings of the 19th All India Oriental Conference, New Delhi, 1957.

(v) Durgāprasādayati alias Nārāyaṇa-priyayati - Summary - ibid P.62.

(vi) Vāsudeva of Mahishamangalam - ibid PP. 62-63.

(vii) Krishnabhattam - the precursor of Kathakali - ibid PP.154-55.

(viii) Tatparya - as a separate Vṛtti - Part II of the Proceedings of the 20th All India Oriental Conference, Bhubaneshvar 1959 - P.P.319-332.

(ix) A probable Malayalam word in Bhāśa and the doubtful authenticity of Abhiṣeka - nāṭakam as a play of Bhāsa.
- Summary - ibid P. 48.

(x) Sāmbaśiva or Akkan Dikshit - ibid P.61-62.

(xi) Allophones of the dental nasal in Sanskrit : A fourteenth century discussion (In the Leelatilak on Malayalam grammar).
Summary of 21st All India Oriental Conference, Srinagar 1961. PP. 44-46.

(xii) Bhartṛhari's list of sentence definition - the textual problem in the Vākyapadīya 11.1.2 - ibid PP 197-198.

(xiii) Prārthayanti - a ghost word discussed by the grammarian - ibid P.247

(xiv) Pāṇini's attitude towards lakṣaṇā - title - summary - 22nd All India Oriental Conference, Gauhati 1965, P.247.

(xv) The Sanghakalli of Keral - ibid P.251

(xvi) The closed 'a' in colloquial Malayalam
- title - ibid P.178.

(xvii) Light on ancient Dravidian Philology from some loan words in Sanskrit

**- K. V. Sarma - Index to papers submitted to the All India Oriental Conference Vol III - (1955-65) PP 83-84.**

10(a) “धातो: कर्मण: समानकर्तृकादिच्छायां वा (3.17) for example शिष्या: पठन्तु इति इच्छति गुरु: cannot be put in the desiderative. And in cases like चौरान् न दिदृक्षते there is no सामर्थ्य or even गमकत्व to get a meaning that the दर्शन and इच्छा are by different agents. In the शब्दकौस्तुभ Bhaṭṭoji himself says that the term अन्तर्धौ in the Sūtra is unnecessary since the expression न चौरान् दिदृक्षते can be explained otherwise.”

- K. Kunjunni Raja - On the meaning of expression चौरान् न दिदृक्षते - C-65. Classical Sanskrit - Summaries of Papers 26th All India Oriental Conference, Ujjain, P.80

10(b) K. Kunjunni Raja - Viṭanidrā : An ancient Bhāṇa from Kerala - C-119

- ibid P.444.

10(c) “The legends connecting Kālidās with Vikramāditya and Kunteshvar were no doubt popular but their historical value is that of Bhojaprabandha.

- K. Kunjunni Raja - Kuntesvar - dautya and Kalidas - K-13 - ibid P.187.

11. The need for using the मातच् form when semantic nuance is implied is stressed in a latter grammatical text मुखभूषण (ed. K. Kunjunni Raja, Adyar Library 1973, P.21)

कुन्तीमात ममाप्येतद्रोचते यद्वयं जले।
सुहृज्जनवृता: पार्थ विहराम यथासुखम्।

(महाभारत I 214 1)

अत्र ‘‘मातुर्मातच् पुत्रार्थमर्हते’’ इति मातजादेश:। मातृशब्दस्य मातजादेशो भवति पूज्यपुत्रसम्बोधने। ननु कुन्तीर्मातर्ममाप्येतदिति पाठे किं क्षतम्। न खलु मातृजादेशो नियमेन स्यात् यथा ‘‘कुन्तीमात: कथमिमापदं त्वमिहात्प्रवान्’’ इति। (M. Bhā III - 172.2) सत्यम्। किन्तु यदि तावन्न वृत्तिविरोध: यदि च सन्ध्यादिषु न दूषणम्, यदि च पूज्यता गम्यते, ततो मातजादेशो युक्त:, विशेषशब्दस्य श्लाघ्यत्वात्। तथा चोक्तम् - यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान् यथावद् व्यवहारकाले। सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दै:।। इति। (Q. Mahābhāṣya 1.1.1)

- K. Kunjunni Raja - The so-called vārttika ‘‘मातुर्मातच् पुत्रार्थमर्हते’’

- Indian Linguistics - Proceedings of the All India Oriental Conference, Kurukshetra, 1974. P. 384.

12. “Thus we are led to conclusion that the so-called view of Maṇḍana

is not quite different from that of Kumārila Bhaṭṭa himself and Gangeśhopādhyāya is wrong in attributing the Ślokavārttika verse to Maṇḍanamishra. This verse is not found in any of the known works of Maṇḍanmishra, and since Maṇḍana is later than Kumārilabhaṭṭa the verse has to be attributed to Kumāril himself."

- K. Kunjunni Raja - A so-called view of Maṇḍana on Word-meaning discussed the Navya-Nyāya school - Section C - Religion and Philosophy - Section VI. Indology Volume 3 Part I - Proceedings of the 26th International Congress of Orientalists, New Delhi, 1964. P.444. Editor - R. N. Dandekar - Bhandarkar Oriental Research Institute, Poona.

13. "The Kūṭṭiyaṭṭam, kept alive in temple theatres or Kuṭṭampalams by the members of the Cākyār and Nambyār communities for more than thousand years, is perhaps the only form of ancient Sanskrit drama that survives in performance today. The Kerala tradition follows, on the whole, the procedure adopted throughout India in ancient times; some innovations were added to suit the tastes of the audience there : the introduction of Malayalam Manipravāla language by the Vidūṣaka to explain the Sanskrit and Prakrit texts, use of parodies and humorous stories.

Among the Sanskrit plays staged by Cākyārs some are based on stories found in the Bṛhatkathā and its versions : Svapnavāsavdatta, Pratjñayaugandharāyaṇa and Avimāraka ascribed to Bhāsa, and the Nāgānanda of king Harṣa. In the Nirvahaṇa, or introduction of the main characters the earlier story is narrated. In many cases the stories narrated are similar to those found in the Bṛhatkathā version, Kathā-saritsāgar,"

- K. Kunjunni Raja - "The Kathāsaritsāgar and Kūṭiyaṭṭam - section - Kathasaritsāgar and the narrative literature of ancient and medieval India - Plenary session 1.1 - Proceedings of the Fifth World Sanskrit Conference, Varanasi, 1981, P.860.

14(i) K. Kunjunni Raja - Chairman, Ancient and Modern Sanskrit - Program of the Sixth World Sanskrit Conference, Philadelphia, P.26

(ii) K. Kunjunni Raja - "Politeness expression in Sanskrit - ibid P.26.

15(i) Review - under "Literature and Rhetorics (Anandavardhanā's theory of poetic language) - 'Prāchi Jyoti' Digest of Indological Studies.

Vol XX-XXI - 1984-85, P.127.

अभिनन्दकृतम् रामचरितम् - ibid. P.128.

(ii) Literary Review (by K. Kunjunni Raja) of "Chānakya-Niti text tradition by Ludwick Sternbach.

Decennial Index to Vishveshwaranand Indological Journal. Vols I-X (1963-70) - K. V. Sarma, 1973.

16. "Studying with K. Raja - Obtituary - Hindu. 31st May 2005.

***